॥ वाल्मीकि रामायण॥

५ सुन्दरकाण्ड

अध्याय ५७

एतदाख्यानं तत्सर्वं हनूमान्मारुतात्मजः ।
भूयः समुपचक्राम वचनं वक्तुमुत्तरम् ॥ १॥

सफलो राघवोद्योगः सुग्रीवस्य च सम्भ्रमः ।
शीलमासाद्य सीताया मम च प्लवनं महत् ॥ २॥

आर्यायाः सदृशं शीलं सीतायाः प्लवगर्षभाः ।
तपसा धारयेल्लोकान्क्रुद्धा वा निर्दहेदपि ॥ ३॥

सर्वथातिप्रवृद्धोऽसौ रावणो राक्षसाधिपः ।
यस्य तां स्पृशतो गात्रं तपसा न विनाशितम् ॥ ४॥

न तदग्निशिखा कुर्यात्संस्पृष्टा पाणिना सती ।
जनकस्यात्मजा कुर्यादुत्क्रोधकलुषीकृता ॥ ५॥

अशोकवनिकामध्ये रावणस्य दुरात्मनः ।
अधस्ताच्छिंशपावृक्षे साध्वी करुणमास्थिता ॥ ६॥

राक्षसीभिः परिवृता शोकसन्तापकर्शिता ।
मेघलेखापरिवृता चन्द्रलेखेव निष्प्रभा ॥ ७॥

अचिन्तयन्ती वैदेही रावणं बलदर्पितम् ।
पतिव्रता च सुश्रोणी अवष्टब्धा च जानकी ॥ ८॥

अनुरक्ता हि वैदेही रामं सर्वात्मना शुभा ।
अनन्यचित्ता रामे च पौलोमीव पुरन्दरे ॥ ९॥

तदेकवासःसंवीता रजोध्वस्ता तथैव च ।
शोकसन्तापदीनाङ्गी सीता भर्तृहिते रता ॥ १०॥

सा मया राक्षसी मध्ये तर्ज्यमाना मुहुर्मुहुः ।
राक्षसीभिर्विरूपाभिर्दृष्टा हि प्रमदा वने ॥ ११॥

एकवेणीधरा दीना भर्तृचिन्तापरायणा ।
अधःशय्या विवर्णाङ्गी पद्मिनीव हिमागमे ॥ १२॥

रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया ।
कथं चिन्मृगशावाक्षी विश्वासमुपपादिता ॥ १३॥

ततः सम्भाषिता चैव सर्वमर्थं च दर्शिता ।
रामसुग्रीवसख्यं च श्रुत्वा प्रीतिमुपागता ॥ १४॥

नियतः समुदाचारो भक्तिर्भर्तरि चोत्तमा ॥ १५॥

यन्न हन्ति दशग्रीवं स महात्मा दशाननः ।
निमित्तमात्रं रामस्तु वधे तस्य भविष्यति ॥ १६॥

एवमास्ते महाभागा सीता शोकपरायणा ।
यदत्र प्रतिकर्तव्यं तत्सर्वमुपपाद्यताम् ॥ १७॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com